# मीमांसायां चैतन्यावधारणा

डॉ. सोमनाथ नेने

भारतीय दार्शनिकप्रस्थानेषु विद्यमाना चैतन्यावधारणा आत्मस्वरुप विवेचन प्रक्रियायामेव प्रकाशिता वर्तते । यद्यप्यात्मनः शरीरेन्दियमनोभ्यः पार्थक्यं सर्वेषामप्यास्तिकदार्शनिकप्रस्थानेषु समानरूपेणाभिमतं तथाप्यात्मनि यच्चैतन्य-मनुभूयते तदात्मनः स्वरूपं तद्भिन्नं वेति वर्तते दार्शनिकानां विवादविषयः । दर्शनस्य नास्तिकवर्गे प्रतिष्ठिते आर्हतदर्शने जीवाजीवयोर्द्वयोः पदार्थयोर्मध्ये चेतनद्रव्यत्वेनात्मनः स्वर्गकारादनैकान्तिकमात्मनः स्वरूपं चैतन्यमिति सुतरां वक्तुं शक्यते[१]। आस्तिकदार्शनिकप्रस्थानेषु सांख्यनये यथा पुरुष पदवाच्यस्यात्मनः स्वरूपत्वेन चैतन्यमभिमतंत[२]थैव अद्वैतवेदान्तिनाम्मतेऽपि ब्रह्मणः सच्चिदा-नन्दात्मकत्वाङ्गी-काराच्चैतन्यमात्मनः स्वरूपत्वेनैवाभिमतं वर्तते[३] । विशिष्टादैत-वादिभिरप्यात्मनो य पार्थत्व धर्मभूतज्ञानवत्वाभ्यां सहात्मनो चित्स्वरुपत्व-मप्यङ्गीक्रियते[४] । औलूक्यमता-वलम्बिनस्तर्करसिका अक्षपादानुयायिनश्च जडत्वमेवात्मनस्स्वरूपं मन्वते । एतयोर्नये चैतन्यस्यात्मरूपत्वन्नैवाभिमतमपितु ज्ञानाभिन्नत्वस्यास्य[५] आत्म-गुणत्वमेवाभिमतमेतेषाम् ।

आस्तिकचिन्तनप्रस्थानेषु परिगणितं मीमासाशास्त्रं हि प्राधान्येन विधिबोधितेषु कर्मसु प्ररुढ़प्रवृत्ति - प्रतिपादनार्थमेव प्रवर्तते । विधिवाक्यप्रधानेषु

वैदिकवाक्याविभागेषु सर्वत्र कर्मप्रतिपादकत्वमङ्गीकुर्वद्भिरेभिः वेदप्रतिपादितस्य यागानुष्ठानात्मकस्य धर्मस्य प्रतिपादनमेवानतमश्चपरमलक्ष्यत्वेनोपस्थाप्यते । यथाहुभट्टवर्या : -

'धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्[६]' । इति ॥ वैदिकवाक्यप-तिपादितानां कर्मणां स्वर्गादिभिः फलैस्सह सम्बन्धो यदि न स्यात्तर्हि न जायेत कस्याप्यस्मिन्कर्मानुष्ठाने प्रवृत्तिः वेदार्थ भूतस्य कर्मणः विनाशान्तिस्फलत्वा-त्कर्मणामनु-ष्ठानानुपपत्या कर्मजन्यत्वेन फलजनकत्वेन च अपूर्वात्मकं तत्त्वमङ्गीकृत्य[७] अस्याश्रयत्वेनात्मानमङ्गीकुर्वतामेतेषां[८] जायते दार्शनिकक्कक्षायां प्रवेशः ।

भाट्ट प्राभाकरमिश्रमतविभूषितायां मीमांसायां मिश्रवर्याणात्म विषयकं चैतन्यविषयकं वा मतं नोपलभ्यते । प्राभाकराणां सिद्धान्ते आत्मस्वरूपं तार्किकमतानुरुपमेव परिलक्ष्यते। एभिरप्यात्मनो विभुत्वं, शरीरेन्द्रियमनोभ्यः पार्थक्यं नित्यत्वं विशेषगुणानाम्बुद्धया-दीनामाश्रयत्वं कर्तृत्वं भोक्तृत्वञ्च न्यायमतानुरूपमेव निरूपितंवर्तते। एभिरप्यात्मनस्सुखा-दिस्वरुपत्वं निरस्य एतेषामाश्रयत्वमेव स्वीक्रियते[९] । अनया दृष्ट्या तार्किकमतेन सहैतेषामात्म-स्वरुपविषयकाणां विचाराणां सादृश्यवशाच्चैतन्य विषयेऽपि एतेषां दृष्ट्या न्यायमतावलम्बिन्या एव भाव्यम् । न्यायमते आत्मनो ज्ञानाभिन्नगुणत्वेन चैतन्यं यथाभिमतं तथात्रापि इदमेव स्वरुपं चैतन्यस्यभिमतं विभाति ।

## भाट्टमीमांसकानां चैतन्यावधारणा

भाट्टानां चैतन्यविषयिणी दृष्टिरूभयवाद समन्वयात्मिकेति परिलक्ष्यते । एतेषां विवेचनेषु यथात्मनः चैतन्यं परिलक्ष्यते तथैवाचेतनत्वस्याप्यात्मनः

प्रतिपादनादु-भयोश्चैतन्याचैतन्ययोरत्र प्रकाश्यते समत्न्वयात्मिका दृष्टिः ।

चैतन्यस्यात्म-रूपत्वम्:-

"सुखदःखाद्यवस्थाश्च गच्छन्नपि नरो मम ।
चैतन्यद्रव्यसत्तादिरूपं नैव विमुञ्चति" ।।[१०] इत्यनया

वार्तिकोक्त्या स्पष्टं प्रतीयते यदत्र द्रव्यसत्ताभ्यां सह चैतन्यमप्यात्मनः स्वरुपेणैवाभिमतं भदृवर्याणाम् । एवमेव तंत्र वार्तिकस्य द्वितीयाध्यायस्य प्रथमे पादेऽपूर्वाधि करणे "अहं प्रत्ययेन हि चैतन्यस्वभावस्यात्मनोऽस्तित्वमात्रमवगम्यत"[११] ।। इत्यत्र "तदपेक्षयैव च चैतन्यात्मकत्वाद्यविभागाच्चोपनिषत्स्वैकात्मव्यवहार[१२] ।" इत्यत्रापि ।

च चैतन्यमात्मनः स्वरुपेणैव प्रतिपादितं वर्तते ।

भट्टदृष्टया तत्त्वानां प्रतिपादनधुरं वहद्भिः पार्थसारथिमिश्रैरपि भूतेन्द्रियविज्ञानानामसंज्ञित्वमचैतन्यम्, अन्यस्तुतेभ्यो नित्यश्चेतन[१३] इत्यत्र न्यायरत्नाकरे तस्मादन्यश्चेतन[१४] इत्यनेन वचनांशेन शास्त्रदीपिकायामपि चैतन्यमात्मनः स्वरूपेणैव प्रतिपादितमित्येव जायते प्रतिपत्तिः ।

**चैतन्यस्यात्मनः स्वरूपत्वं विरूपत्वञ्च**

उक्तैस्सन्दर्भैर्यद्यपि चैतन्यमात्मरूपेणाभिमतं वर्तते तथापि नैतच्चैतन्यं सांख्यशास्त्रे प्रतिपादितेन चैतन्येनाभिन्नमपितु विलक्षणमेवेति परिलक्ष्यते । सांख्ये प्रतिपादितस्य चैतन्यस्य बुद्धिपरिणामेन ज्ञानेन सह स्पष्टमेव पार्थक्यमुपलश्यते[१५] परन्तु यथा न्यायवैशेषिकसिद्धान्तयोर्गुणपदार्थेषु पृथक्तया गणनाया

अभावाच्चैतन्यस्य ज्ञानात्मकत्वं मन्यते विद्वद्भिस्तथैव भाट्टतन्त्रेऽपि चैतन्येन सह कर्तृत्व भोक्तृत्वयोरप्युपादानात्सांख्यवदात्मनश्चैतन्यमात्रस्वरूपस्यानङ्गीकाराच्च प्रतिभाति यदत्रात्मनश्चैतन्यं सांख्यविलक्षणं ज्ञानात्मकमेवाभिमतमिति ।

चैतन्यस्य ज्ञानात्मकत्वाङ्गीकार एवोपपद्येते नारायणपण्डितकमलाकर-भट्टयोरात्मविषयकौ सन्दर्भौ। मानमेयोदयसंज्ञकस्य ग्रन्थस्य मेयभागस्य रचयितारो नारायणपण्डिता 'आत्मा चैतन्याश्रय'[१६] इत्यत्र चैतन्यमात्माश्रितत्वेन गुणात्मकत्वेनाविष्कुर्वन्ति। "स च देहेन्द्रियज्ञानसुखेभ्यो व्यतिरिच्यते"[१७] इत्यत्र च ज्ञानाद्भिन्नमात्मस्वरुपं प्रतिपादयन्ति । चैतन्यस्य ज्ञानात्मकत्वाङ्गीकार एवात्मगुणत्वेन आत्मना सहास्योपपद्यत आंशिको भेदः। गुणगुणिनोश्च तादात्म्याङ्गीकारात् तादात्म्यस्य च भेदाऽभेदरूपादभेदवद्भेद प्रतिपादकत्वमप्युपपद्यते ।

एवमेव मीमांसाकुतूहले आत्मनिरूपणप्रसङ्गे 'तद्गुणाः संख्या परिमाणसंयोगबुद्धि सुखदुःखेच्छाप्रयत्नधर्माधर्मसंस्काराः।' तेच नित्या लाघवात् समवायवत् । 'स च' नित्यज्ञानसुखवान् 'सत्यं ज्ञानमनन्तं ब्रह्म' नित्यं विज्ञानमानन्दंब्रह्म । 'अत्रायं पुरूषः स्वयं ज्योतिः'। इत्यादिश्रुतेः । इत्यत्र अग्रे च "विज्ञानमानन्दम्" इति मत्वर्थेऽच् प्रत्ययः। तेन ज्ञानवान् न ज्ञानसुखात्मकः ज्ञानवानहमिति भेदप्रतीतेश्च[१८] इत्यत्र चात्मनो नित्यसुखवन्नित्यज्ञानवत्त्वमपि भट्टपादैः प्रकाशितं वर्तते ।

यद्यप्यत्र चैतन्यस्य स्पष्टोल्लेखो नास्ति तथापि नारायणपण्डितविर-चितमानमेयोदयस्य मेय भागे पूर्वोक्ते प्रथमे सन्दर्भे आत्मनश्चैतन्याश्रयत्वमपरे

सन्दर्भे ज्ञानभेदवत्वञ्च निरुपितं वर्तते । आत्मगुणेषु चैतन्यस्य पृथक्तयाऽनुल्लेखा-च्चैतन्यानुपपत्या एवोपपद्यते चैतन्यस्य ज्ञानात्मकत्वम् । एवञ्चास्य ज्ञान-वत्वसन्दर्भस्य नारायणोक्तेन चैतन्याश्रयत्वप्रतिपादकेन सन्दर्भेण सहैकवाक्यता विधानादत्रापि विवेचितस्य ज्ञानाश्रयत्वस्योपपद्यते चैतन्याश्रयत्वम् ।

चैतन्यस्य ज्ञानात्मकत्वाङ्गीकारेऽपि वेदान्तस्याद्वैतप्रस्थानवदत्र भाट्टप्रघट्टे ज्ञानात्मकस्य चैतन्यस्यात्मरूपत्वमभिमतं नास्ति । एभिरत्र ज्ञानात्मकस्य चैतन्यस्याश्रयत्वमेवात्मनः प्रतिपाद्यते । अस्यां स्थितावात्मनश्चैतन्य स्वरूपबोधकानां सन्दर्भाणां जायतेरसङ्गतिरित्युत्पद्यते प्रश्नः ? अस्य प्रश्नस्य समाधानार्थमेव भाट्टमीमांसकैरात्मनो ज्ञानाश्रयत्वं विहाय ज्ञानात्मकश्चैतन्यानुकूलायाः ज्ञानशक्तेराश्रयत्वमङ्गीकृत्य ज्ञानशक्तिस्वभावत्व-मात्मनः प्रतिपाद्य निष्पाद्यते सङ्गतिरेतेषां सन्दर्भाणाम् । "ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान्[१९] इत्यनेन ब्वार्तिकांशेन भट्टवर्यैर्यथा प्रसाधितमात्मनो ज्ञानशक्ति स्वभावत्वं तथैव -

अविनाशी स्वरूपेण पुरुषो यातु नाशिता ।
मात्राणां साऽधिकाराणां भूतादीनामसंज्ञिता ॥[२०] इत्यस्य वार्तिकस्य व्याख्याप्रसङ्गे विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीमं मन्त्रं विवृण्वद्भि: पार्थसारथिमिश्रवर्यैरपि न्यायरत्नाकरे एतदुक्तं भवति - 'विज्ञानघन' इति ज्ञानशक्तिस्वभावस्यात्मनोऽभिधानम् । न ज्ञानेमात्रस्य[२१], इत्यनेनांशेनात्र शास्त्रदीपिकायामपि नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इति वाक्यं ज्ञानशक्त्य[२२] भिप्रायमित्यङ्गीकुर्व- द्भिरात्मनो ज्ञानशक्तिस्वभावात्मकाभिन्नं

ज्ञानशक्तिवैशिष्ट्यं प्रकाशितम् ।

उक्तदिशा चैतन्यात्मकस्य ज्ञानस्य ज्ञानशक्तिरूपस्य आत्मना सह सम्बन्धविधानाच्छक्तेश्चात्मनि भेदाऽभेदेन तादात्म्येनैव सम्बन्धेन विद्यमानत्वाच्चैतन्यात्मकस्य ज्ञानस्य आत्मना सह भिन्नाऽभिन्ना प्रतीतिरूपपद्यते।

निष्कर्षरूपेण एतदेव वक्तं शक्यते यदत्र भाट्टप्रघट्टे आत्मनः स्वरूपेण चैतन्यमभिमतं नास्ति । नित्यज्ञानशक्तिमत्वेन रूपेणैवात्मनश्चैतन्यमत्र प्रसाधितं विद्यते । अस्मादेव कारणादनुकूलासु स्थितिषु शरीरेन्द्रियविषयेषु सत्स्वात्मन्युत्पन्नं ज्ञानात्मकं चैतन्यमात्मनः स्वभावत्वेन शक्यतेऽङ्गीकर्तुम् । प्रतिकूलावस्थायां यत्र शरीरेन्द्रियविषयाणां नास्ति सद्भावस्तस्यामवस्थायां यथा सुषुप्तौ मुक्तौ वा नाङ्गीक्रियते ज्ञानात्मकस्य चैतन्यस्यास्तित्त्वम् । "भूतादीनामसंज्ञिता" इत्यनेन वार्तिकांशेन भाट्टप्रघट्टस्थापकैः कुमारिलैर्निराकृतं सुषुप्तौ मुक्तात्मनि वा ज्ञानात्मकं चैतन्यम् ।

एवञ्च चैतन्यात्मरूपेण सह ज्ञानात्मकेन तद्भिन्नेन रूपेणाऽपि प्रतिपादनादत्र चैतन्यस्वरुपविषये भाट्टमीमांसकैरङ्गीकृतो विभाति विलक्षणः समन्वयवादः । मन्ये, अस्मादेव कारणाज्जडबोधात्मकमात्मनस्स्वरूपमङ्गीकृतं भाट्टैरिति प्रतिपाद्यते हिरयन्नाराधाकृष्णनूबलदेवोपाध्यायादिभिरित्यलम् ।

**सन्दर्भनिर्देशः**


१. भारतीय दर्शन की रूपरेखा पृ.सं. १५८ डॉ. एम. हिरयन्ना, राजकमल - प्रकाशन, दिल्ली १९८७.

२. तत्र जरामरणकृतं दुःख प्राप्नोति चेतनः पुरूषः ।

सांख्यकारिका, संख्या - ५५

३. न्यायकोशः पृ.सं. २९६ पक्तिः ०८

४. भारतीय-दर्शन - की रूपरेखा पृ. ४०२ - ४०३, एम. हिरयन्ना, राजकमलप्रकाशन, दिल्ली १९८७.

५. अतो ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् । न्यायसिद्धान्त-मुक्तावली पृ. १६९ किरणावलीव्याख्या, चौखम्बा संस्कृतसंस्थानम् वाराणसी १९८३.

६. श्लोकवार्तिकम्, पृ ०५, तारापब्लिकेशन्स, वाराणसी, १९७८,

७. फलाय विहितं कर्म क्षणिकं चिरभाविने ।
तात्सिद्धिर्नान्यथेत्येवमपूर्वं प्रति गम्यते ॥
तन्त्रवार्तिकम्, द्वितीयो भागः, पृ.सं. ३६, गङ्गानाथझा केन्द्रीय-संस्कृत-विद्यापीठम्, प्रयागः, १९९०.

८. आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते ॥
श्लोकवार्तिकम् पृ. सं. ४७४.

९. बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ।
प्रकरणपञ्चिका पृ. ३१६, काशीहिन्दूविश्वविद्यालयः वाराणसी, १९६१.

१०. श्लोकवार्तिकम्, आत्मवादः, कारिकासंख्या २६,

११+१२. अजितोपेतं तन्त्रवार्तिकम् पृष्ठ संख्या ५३ एवं पृष्ठसंख्या-५८, द्वितीयो भागः, गङ्गानाथ-झा केन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः, १९९०.

१३. श्लोकवार्तिकस्य न्यायरत्नाकरव्याख्या, श्लोकवार्तिकम्, पृष्ठसंख्या ५१४, पङ्क्तिः २७. तारापब्लिकेशन्स, वाराणसी, १९७८.

१४. शास्त्रदीपिका, पृष्ठसंख्या १२. पंक्तिः ०४, कृष्णदास - अकादमी वाराणसी, १९७८.

१५. अध्यवसायो बद्धिधर्मो ज्ञानं विराग ऐश्वर्यम् ।
सांख्यकारिका, - संख्या २३,

१६. "आत्मा चैतन्याश्रयः" मानमेयोदयः, पृष्ठसंख्या १८३.

१७. सच देहेन्द्रिय - मानमेयोदयः पृष्ठसंख्या १८७.
चौखम्बा - विद्याभवनम्, वाराणसी, १९९६.

१८. तद्गुणाः संख्यापरिमाण - मीमांसाकुतूहलम् पृ. ६७.
सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, १९८७.

१९. श्लोकवार्तिकम्, आत्मवादः श्लोकसंख्या - ७३.

२०. श्लोकवार्तिकम्, आत्मवादः श्लोकसंख्या १४७.

२१. न्यायरत्नाकरव्याख्या - श्लोकवार्तिकम् पृष्ठसंख्या ५१४, पङ्क्तिः १९.
तारापब्लिकेशन्स, वाराणसी, १९७८.

२२. शास्त्रदीपिका, पृष्ठसंख्या १२७, कृष्णदास अकादमी, वाराणसी,
१९८८.